41946

श्रीगणेशाय नमः

श्रीसरस्वत्यै नमः श्रीगुरुभ्य

BJWL FCP
GN041946

श्रीवालुकेश्वरो जयति।

# अथ श्रीमदष्टाध्यायीसूत्रार्यासहस्री।



## मंगलम्.

श्रीगणपादिसशक्तिकसुरनतिपूर्वकमुदीर्यते भक्त्या।
श्रीमत्यष्टाध्यायीसूत्रार्यादशशती मयूरभुवा ॥ १ ॥
स जयति देवः श्रीमान्येन हि शुक्लीकृता इमे हंसाः।
हरितीकृताः शुका अपि येन तथा चित्रिता इह मयूराः॥२॥
येनांञ्जसाऽक्षरसमाम्नायमपि महेश्वरात्समधिगम्य।
कृत्स्नमिदं व्याकरणं प्रोक्तं तस्मै नमोऽस्तु पाणिनये॥३॥
येन गिरः पुरुषाणां धौता उत शब्दवारिभिर्विमलैः।
अज्ञानभवम्भिन्नन्तमोऽपि तस्मै नमोऽस्तु पाणिनये ॥४॥
मुखमेव व्याकरणं स्मृतमिति विदुषाम्मुदे तथाऽन्येषाम्।
व्युत्पत्तय आर्याणां ग्रथ्यत एषा यथामति सहस्री ॥५॥



## प्रत्याहारसूत्राणि.

अ[1]इउण् ऋमाद् ऋ[2]ऌक् तत
ए[3]ओङ् ऐ[4]औच्च ह[5]यवरट् साक्षात्।
ल[6]ण् ञ[7]मङणनम् पश्चा-
झ्[8]झभञ् च घ[9]ढधष् तथैव ज[10]बगडदश्॥१॥
स्पष्टतया ख[11]फछठथच-
टतव् क[12]पय् केवलं च श[13]षसर ह[14]ल्।

इति सूत्राणि प्रत्याहारपदपुरःसराण्युपेयानि ॥ २ ॥

# अथ प्रथमाध्याये

## प्रथमः पादः

वृद्धिः केवलमादैजदेङ् गुण इकस्तथैव गुणवृद्धी
नें च धातुलोप इह निःसंदेहतयाऽऽर्धधातुके क्ङिति च
दीधीवेवीटां च स्फुटं हलोऽनन्तराश्च संयोगः
अनुनासिक एष स्यात्साक्षान्मुखनासिकावचन एव
तुल्यास्यप्रयतनमिह सवर्णमुत नाञ्झलावसन्देहम्
ईदूदेद्विवचनमपि भवेत्प्रगृह्यन्तथाऽदसो माच्छे
निःसंदेहतयाऽसौ निपात एकाजनाङ् स्वयं तत ओत्
शाकल्यस्येतौ संबुद्धौ केवलमनार्षे उञ ऊँ स्यात्
ईदूतावपि सप्तम्यर्थे दाधाध्वदाप् स्वयं साक्षात्
आद्यंतवदेकस्मिन्निःसंशयमेव घेस्तरप्तमपौ
बहुगणवतुडति संख्या ष्णांता षट्डति च केवलं स्पष्टम्
क्तक्तवतू निष्ठाऽपि च सर्वादीन्येव सर्वनामानि
स्फुटमेव विभाषा दिक्समास एषा स्वयं बहुव्रीहौ
नें बहुव्रीहौ साक्षादेव तृतीयासमास एवं स्यात्
द्वंद्वे च विभाषा जस्येल्पार्धमथमचरमपूर्वाश्च
पूर्वपरपुरोगमसंज्ञायां केवलमथो व्यवस्थायाम्

अज्ञातिधनाख्यायां स्वमेव केवलमिदं परिज्ञेयम्
अप्यन्तरमेव बहिर्योगे साक्षात्तथोपसंव्याने
तदनंतरं स्वरादिनिपातं स्यादव्ययं यथार्हतया
अपि चासर्वविभक्तिस्ताद्धित इत्येव सम्यगवगम्यम्
स्यात्कृन्मेजंतः क्त्वातोसुन्कसुनस्तथाऽव्ययीभावः
स्पष्टं शि सर्वनामस्थानमिदं सुडनपुंसकस्य स्यात्
भवति नं वेति विभाषा तथेर्यणः संप्रसारणमवश्यम्
आद्यंतौ टकितावपि मिदचोंऽत्यात्पर इति क्रमादेव
ह्रस्वादेश इगेचः स्थानेयोगा भवेदियं षष्ठी
स्थानेऽन्तरतम एष उरण्परोऽन्त्यस्य चाप्यलो ङिच्च
आदेः परस्य साक्षाद्भवेदनेकाल्शिदेव सर्वस्य
स्थानिवदादेशोऽनल्विधावचः प्राग्विधावपि परस्मिन्
न पदान्तप्रभृतिविधिष्वेवं द्विर्वचन एव नूनमचि
लोपो ह्यदर्शनम्प्रत्ययस्य लुक्श्लुलुप एव सर्वत्र
प्रत्ययलोपे प्रत्ययलक्षणमंगस्य न स्फुटं लुमता
निःशंकमचोऽन्त्यादिटि भवेदलोऽन्त्याच्च पूर्व उपधैव
तस्मिन्निति निर्दिष्टे प्राचस्तस्मादितीतरस्यापि
स्वं रूपं शब्दस्याप्यशब्दसंज्ञा भवेदसन्देहम्
अपि चाप्रत्यय एवाणुदित्सवर्णस्य केवलं साक्षात्
तपरस्तत्कालस्य च भवेत्स्वयमिति स्फुटं परिज्ञेयम्

अन्त्येन सहेताऽऽदिर्येन विधिः केवलं तदन्तस्य
तदृद्धं यस्याचामादिर्वृद्धिस्तथा त्यदादीनि
एङ् प्राचां देश इति प्रथमाध्यायाद्यपाद इह पूर्णः

---

## १—द्वितीयः पादः

गाङ्कुटादिभ्योऽञ्णिन्ङित्च्चैव विजे इड् विभाषोर्णोः
अपि सार्वधातुकमपित्साक्षाल्लिट् किञ्चिद्वेदसंयोगात्
भवतीधिभ्यां च तथा मृडमृदगुधकुषवदक्लिशवसः क्त्वा
ग्रहिरुदविदस्वपिप्रुषप्रच्छः संश्च झलिको हलन्ताच्च
अप्यात्मनेपदेष्विह निःसंशयमेव लिङ्सिचावुश्च
वा गम एव हनः सिच् स्वयं यमो गन्धने यथावत्स्यात्
उपयमनेऽथ विभाषा स्थाघ्वोरिच्च क्रमेण न क्त्वा सेट्
शीङ्स्विदिमिदिक्ष्विदिधृषो निष्ठा पश्चान्मृषस्तितिक्षायाम्
भावादिकर्मणोरप्यन्यतरस्यां भवेदुदुपधाच्च
पूङः क्त्वा च ततः परमसंशयं नोपधात्थफान्ताद्वा
अपि वाञ्चिलुञ्च्यृतस्तृषिमृष्यादेः काश्यपस्य निःशंकम्
व्युपधाद्वलो हलादेः संश्च यथायथमिति स्फुटमुपेयम्
तत्पश्चादूकालोऽज्झस्वो दीर्घस्तथा प्लुतोऽचश्च

उच्चैरुदात्त इतरो नीचैः स्वरितस्तथा समाहारः
अर्धह्रस्वमुदात्तन्तस्यादित एव केवलम्बोध्यम्
अप्येकश्रुति दूरात्सम्बुद्धावेव नात्र सन्देहः
तत एव यज्ञकर्मण्यप्यजपन्यूङ्खसामसु स्पष्टम्
उच्चैस्तरामुत वषट्कारश्छन्दसि भवेद्विभाषैव
नँ च सुब्रह्मण्यायां स्वरितस्य तथैव केवलमुदात्तः
अनुदात्त एव केवलमिह देवब्रह्मणोरसन्देहम्
स्फुटमेव संहितायामनुदात्तानां यथायथं स्वरितात्
निःसन्देहमुदात्तस्वरितपरस्याञ्जसैव सन्नतरः
केवलमपृक्त एकाल्प्रत्यय इत्यत्र नास्ति सन्देहः
स समानाधिकरण उत तत्पुरुषः कर्मधारयः साक्षात्
स्यात्प्रथमानिर्दिष्टं केवलमुपसर्जनं समासे तत्
स्पष्टमपूर्वनिपातेऽप्येकविभक्ति स्वयं न सन्देहः
अर्थवदधातुरप्रत्यय एव प्रातिपदिकमवधेयम्
कृत्तद्धितौ समासा ह्रस्वः प्रातिपदिकस्य च क्लीबे
उपसर्जनस्य किल गोस्त्रियोश्च तद्धितलुकि च लुंगिद्वोण्याः
व्यक्तिवचने प्रकृतिवल्लुपि त्वैजातेर्विशेषणानां च
संज्ञाप्रमाणभावात्तदशिष्यं केवलं न सन्देहः
लुब्योगाप्रख्यानादित्यपि सुधिया यथायथं बोध्यम्
योगप्रमाण एव च तदभावेऽदर्शनं यथावत्स्यात्

अर्थस्य चान्यमानात्स्यान्मुख्यप्रत्ययार्थवचनमिह
कालोपसर्जनेऽपि च तुल्यं स्यान्नात्र संशयः कश्चित्
अन्यतरस्यां जात्याख्यायां बहुवचनमेतदेकस्मिन्
अस्मदो द्वयोर्मे प्रोष्ठपदाफल्गुनीसमाख्यानाम्
एकवचनमेव पुनर्वस्वोश्छन्दसि विशाखयोश्चैव
तिष्यपुनर्वस्वोर्बहुवचनस्य द्विवचनं च भद्रद्वे
नित्यमथैकविभक्ताविहैकशेषो भवेत्सरूपाणाम्
वृद्धो यूना यदि तल्लक्षण एव स्फुटो विशेषः स्यात्
स्त्री पुंवच्चैव पुमान् स्त्रियाऽत्र नास्त्येव संशयः कश्चित्
स्वसृदुहितृभ्यां केवलमसंशयं भ्रातृपुत्रकावेव
एकवदन्यतरस्यां क्लीबेनाक्लीबमुत पितॉं मात्रा
श्वशुरः श्वश्रा साक्षान्नित्यं सर्वैरपि त्यदादीनि
ग्राम्यपशुसमूहेष्वपि निःसंशयमतरुणेषु च स्त्री स्यात्

---

## १—तृतीयः पादः

भूवाद्या धातव उपदेश इदनुनासिकोऽञ्झलन्त्यं च
न विभक्तौ तुस्मा इटुडव आदिः प्रत्ययस्य षोऽथ चुर्दू
तदनंतरमेव लशक्वतद्धिते तस्यं केवलं लोपः
अनुदेशो हि समानामेष यथासंख्यमेव निःशंकम्

[11]अधिकारः स्वरितेनाप्युदात्तात्मनेपदमदोऽनुदात्तङितः
स्याद्भावकर्मणोरिह [12]कर्मव्यतिहार एव कर्तरि च
[13]न [14]च गतिहिंसार्थेभ्यो [15]ह्यन्योन्याद्युपपदादपि विशो [16]नेः
क्रियं [17]उत परिव्यवेभ्यो [18]विपराभ्यां जेरसंशयं साक्षात्
स्फुटमोंङो दोऽनास्यविहरणे क्रीडोऽनुसम्परिभ्यश्च
[19]स्थेश्च समवप्रविभ्यः प्रकाशनस्थेयसंज्ञयोश्चैव
केवलमनूर्ध्वकर्मण्युदोऽप्युपान्मंत्रकरण एव तथा
साक्षादकर्मकात्तपः उद्भिभ्यां यमहनः क्रमादाङः
गम्यृच्छिभ्यां सम उत निसमुपविभ्यो ह एव निःशंकम्
स्पर्धायामाङः कृञ उत गंधनपूर्वके प्रसहनेऽधेः
वेः शब्दकर्मणश्चाप्यकर्मकादेव केवलं स्पष्टम्
संमाननादिषु नियः कर्मण्यशरीर एव कर्तृस्थे
[20]वृत्तिप्रभृतिषु साक्षात्क्रमो निरंतरमथो उपपराभ्याम्
ओंङ उतोद्गमने वेः पादविहरणे तथैव निःशंकम्
तत एव समर्थाभ्याम्पोपाभ्यां स्पष्टमनुपसर्गाद्वा
पश्चादपह्नवे ज्ञः क्रमेण केवलमकर्मकाच्चैव
स्फुटमेव सम्प्रतिभ्यां यथायथमनुक्रमादनाध्याने
भोंसनयत्नज्ञानविमत्युपभाषोपमंत्रणेषु वदः
व्यक्तगिरामुच्चारण एवोनोरप्यकर्मकात्साक्षात्
स्योद्विप्रलाप एवविभाषाऽवाद्भ्रः समः प्रतिज्ञाने

नूनं सैकर्मकाच्चर उदैस्तृतीयायुतात्समश्चैव
दाणैश्च सा यदि चतुर्थ्यर्थे स्वैकरण उपाद्यमः साक्षात्
ज्ञाश्रुस्मृदृशां च सनो नोनोर्ज्ञः श्रुव उताङ्प्रातिभ्यां च
शितं एव शदेर्ग्रियतेरनुक्रमाल्लुङ्लिङोः सनः प्राग्वत्
आम्प्रत्ययवच्च कृञोऽप्यनुप्रयोगस्य केवलं साक्षात्
प्रोपाभ्यां च युजोऽमखपात्रेषु समः क्ष्णुवो भुजोऽनवने
यत्कर्मे णेरणौ णौ चेत्कर्ता स्वयमसावनाध्याने
भीस्म्योर्हेतुभये गृधिवंच्योरेव प्रलंभने स्पष्टम्
निःशंकं संमाननशालीनीकरणयोस्तथैव लियः
साक्षान्निमित्योपपदात्स्पष्टतया केवलं कृञोऽभ्यासे
तत एव स्वैरितञितः क्रियाफले चापि कर्त्रभिप्राये
वेद एवापान्निपाच्च उत समुदाङ्भ्यः केवलं यमोऽग्रंथे
ज्ञोऽनुपसर्गादुपपदयोगेच द्योतिते विभाषा स्यात्
स्याच्च परस्मैपदमुत शेषात्कर्तरि कृञोऽप्यनुपराभ्याम्
प्रत्यभ्यतिभ्य एव क्षिपस्तथा प्राद्वहः परेश्च मृषः
निःसंशयं रमो व्याङ्परिभ्य एव स्वयं तत उपाच्च
सोऽकर्मकाद्विभाषा बुधयुधनशजनपुरःसरेभ्यो णेः
निर्गरणचलनार्थेभ्योऽप्यकर्मकादजडकर्तृकाच्चाणौ
नं च पादम्याद्या अपि वां क्यष एव स्वयं लुङि द्युभ्यः
वृभ्यः स्यसनोः साक्षाल्लुटि च क्रृपः केवलं न संदेहः

---

## १—चतुर्थः पादः

एकैव[1] चाकडारात्संज्ञा कार्यं[2] परं[3] विरोधे स्यात्
यूं[4] स्त्र्याख्यौ साक्षान्नद्यस्त्री नँ[5] कदाचिदियङुवङ्स्थानौ
वौमि[6] ङिति ह्रस्वश्च घँसाखि च शेषः सँमास एा पतिः
छंदसि[7] षष्ठीयुत उत लँघ्वणु[8] संयोग[9] एव गुरु दीर्घम्[10]
यस्मात्प्रत्ययविधिरप्यंगं[11] स्यात्प्रत्यये तदाद्येव
पदमेव[12] सुप्तिङंतं[13] नः[14] क्ये सिति[15] च स्वयं परिज्ञेयम्
स्वौँदिष्वसर्वनामस्थाने[16] यँचि भं[17] तँसौ[18] च मत्वर्थे
छंदँस्ययस्मयादीन्यपि बहुँ[19]वचनं वहुष्वसंदेहम्
स्तो द्विवँचनैकवचने स्पष्टतया व्येकयोस्ततः साक्षात्
कौँरक[20] उत ध्रुँवमपादानमपाये[21] न संशयोऽस्त्यत्र
भीत्रार्थानामपि भयहेतुरँसोढः[22] स्वयं पराजेश्च
निःसंदेहतयैवाऽप्येँभीप्सितः[23] सपदि वारणार्थानाम्
येनाँदर्शनमिच्छत्यंतर्धौ[24] चोपयोग आख्याता
स्याज्ज्ञानिकँर्तुः[25] प्रकृतिः प्रभवो[26] भुव एव केवलं स्पष्टम्
यं कर्मणा[27] स्वयमभिप्रैति विशंकं स संप्रदानमिह
रुच्यर्थानाम्प्रीतः श्लाँघह्नुङ्स्थाशपां[28] सुबोधार्हः
धारेरुतोत्तमर्णः स्पृँहेस्तथाऽभीप्सितो[29] न संदेहः
क्रोँधद्रोहासूयार्थानामेव यं प्रति च कोपः

साक्षात्क्रुधद्रुहोरपि केवलमेवोपसृष्टयोः कर्म
अपि निःसंदेहतया रोधीक्ष्योरेव यस्य विप्रश्नः
श्रुव एव प्रत्याङ्भ्यां प्राचः कर्ताऽप्यनुप्रतिगृणश्च
साधकतमं हि करणं कर्म दिवः केवलं न संदेहः
अन्यतरस्यां च परिक्रयणे स्यात्संप्रदानमेव सदा
आधारोऽधिकरणमधिशीङ्स्थासां कर्म चाभिनिविशोऽपि
स्पृशमुपान्वध्याङ्वस ईप्सितमेव कर्तुरिह कर्म
भवति तथायुक्तं चाप्यनीप्सितं सर्वथाऽनभिहितं च
इहे शब्दकर्मणां गत्याद्यर्थानामकर्मकाणां च
य उताणौ कर्ताऽसौ णौ कर्म स्यादसंशयं चैवम्
हृक्रोरन्यतरस्यां स्वतंत्र एव स्वयं भवेत्कर्ता
हेतुश्च तत्प्रयोजक एते प्राग्रीश्वरान्निपाताश्च
चाद्या ह्यसत्व एव प्राद्या व्यापारयोग उपसर्गाः
साक्षाद्गतिरूर्यादिच्विडाच एवानुकरणमानितिपरम्
स्तः सदसती समादरतादितरयोर्भूषणेऽप्यलं साक्षात्
अंतरपरिग्रहेऽपि श्रद्धाप्रतिघात उत कणेमनसी
अंव्ययमेव पुरोऽस्तं गत्यर्थवदेषु तावदच्छेति
स्पृशमंदोऽनुपदेशेऽप्यंतर्धौस्यात्तिरः कृञि विभाषा
एवमुपाजेऽन्वाजे साक्षात्प्रभृतीनि चैव निःशंकम्
नूनमनित्याधाने केवलमुरसिमनसी न संदेहः

Poona M A

मध्ये पदे निवचने नित्यं हस्तेऽप्युपयमने पाणौ
साक्षात्प्राध्वं बंधन औपम्ये जीविकोपनिषदौ च
ते प्राग्धातोरिछंदासि परे तथा व्यवहिताश्च विज्ञेयाः
निःसंदेहतयैव स्युः कर्मप्रवचनीयपदवाच्याः
स्फुटमेवानुर्लक्षण एष तृतीयार्थ एव हीनेऽपि
अधिक उपश्चार्परी वर्जन आङभिदधाति मर्यादाम्
प्रतिपर्यनवो लक्षणभागादिषु केवलं ह्याभिरभागे
प्रतिदानप्रतिनिध्योःप्रतिरेवानर्थकौ तथाऽधिपरी
पूजायां सुरतिरतिक्रमणे संभावनादिषु तथाऽपिः
अधिरीश्वरे विभाषा कृञि च परस्मैपदं ल एव स्यात्
निःशंकमात्मनेपदमेव तङानाविति स्वयं बोध्यम्
त्रीणि त्रीण्येव तिङः प्रथमोमध्यम उतोत्तमश्चैव
एकवचनं द्विवचनं बहुवचनमथो सुपो विभक्तिश्च
स्थानिनि युष्मद्युपपद उत मध्यम इह समाननिलये स्यात्
मन्योपपदे ह्युत्तम एकवदुत मन्यतेः प्रहासे च
अस्मद्युत्तम एव प्रथमः शेषे तथैव च स्पष्टम्
अपि संहितां परः संनिधिर्विरामोऽवसानमेवस्यात्

॥ इति प्रथमोऽध्यायः ॥

( आर्यासंख्या ९२ ).

# अथ द्वितीयाध्याये

## प्रथमः पादः

स्यात्पदविधिः समर्थः केवलमिति सर्वदा बुधैर्ध्येयम्
साक्षात्परांगवत्स्यात्स्वरे सुबामंत्रिते न संदेहः
प्रागेवं कडारात्स्यात्समास उत सह सुपाऽव्ययीभावः
अप्यव्ययं विभक्तिप्रभृतिषु साक्षाद्यथाऽसदृशभावे
यावदवधारणे सुप्प्रतिना निःशंकमेव मात्रार्थे
अक्षशलाकासंख्याः परिणा च यथायथं विभाषैव
अपपरिबहिरञ्चव उत पंचम्याऽङ् स्पष्टमभिविधिप्रभृतौ
स्तो लक्ष्मणाऽभिमुख्ये ह्याभिप्रती अनुरपीह यत्समया
यस्याप्यायामः स्यात्तिष्ठद्गुपुरःसराणि च स्पष्टम्
पारे मध्ये षष्ठ्या वा वंश्येन स्वयं भवेत्संख्या
अपि च नदीभिः केवलमन्यपदार्थे तथैव संज्ञायाम्
तत्पुरुषो द्विगुरपि च श्रितपतितप्रभृतिभिर्द्वितीया स्यात्
तेन स्वयं च खट्वा क्षेपे तत एव सामि कालाश्च
संयोगे च तृतीया गुणवचनेनैव तत्कृतार्थेन
संमिश्रश्लक्ष्णप्राक्सदृशसमोनार्थकलहनिपुणैश्च
कर्तृकरणे कृताऽपि च बहुलं कृत्यैस्तथाऽधिकार्थोक्तौ

अन्नेन व्यंजनमपि मिश्रीकरणं तथैव भक्ष्येण
अपि च तदर्थार्थमुखैश्चतुर्थ्यर्थो पंचमी भयेनैव
पतितापेतापोढप्रभृतिभिरप्यल्पशो न संदेहः
स्तोकांतिकदूरार्थककृच्छ्राणि क्तेन सप्तमी शौंडैः
परिपक्वासिद्धमुखरैः क्षेपे ध्वांक्षेण चाप्यृणे कृत्यैः
संज्ञायां क्तेनाहोरात्रावयवाश्च तत्र च क्षेपे
पात्रेसमितादय उत तदनंतरमेव केवलं स्पष्टम्
प्राक्कालैकनवजरत्प्रभृति समानाधिकरणयोगेन
दिक्संख्ये संज्ञायां तत्पश्चात्तद्धितार्थमुखरे च
संख्यापूर्वो द्विगुरपि कुत्सनयेगेन कुत्सितान्येव
पापादिकुत्सितैरुपमानानि समानधर्मवचनैश्च
व्याघ्रादिभिरप्युपमितमिह सामान्याप्रयोग एव तथा
साक्षाद्विशेषणं स्यात्केवलमेव बहुलं विशेष्येण
प्रथमचरमपूर्वापरसममध्यमहीनमध्यवीराश्च
श्रेण्याद्याः कृतमुखरैः क्तेनाननेन नाञ्विशिष्टेन
सन्महदुत्तमपरमोत्कृष्टाः स्फुटमेव पूज्यमानैश्च
तत एव पूज्यमानं वृंदारकनागकुंजरैः साक्षात्
कतरकतमौ हि जातिप्रश्ने तदनंतरं च किं क्षेपे
पोटायुवतिकतिपयस्तोकप्रभृतिभिरसंशयं जातिः
साक्षात्स्तुतिवचनैरपि युवा खलतिपलितवलिनजरतीभिः

सुस्पष्टतयाऽऽजाऽत्या यथायथं चैव कृत्यतुल्याख्याः
वर्णो वर्णेन तथा साक्षाच्छ्मणादिभिः कुमारोऽपि
गौर्भिण्या चैव चतुष्पादः केवलमसंशयं स्पष्टम्
अपि च मयूरव्यंसकपुरःसरा इति बुधैः परिज्ञेयम्

---

२—द्वितीयः पा[illegible]

पूर्वापराधरोत्तरमेकाधिकरण उतावयवेन
अर्धं नपुंसकमथो अन्यतरस्यां द्वितीयपूर्वा[illegible]
प्राप्तापन्ने च तथा द्वितीययैव परिमाणिना कालाः
नञ् स्पष्टमीषदकृता षष्ठी स्याद्याजकादिभिश्चापि
निर्धारणे न पूरणपूर्वसमानाधिकरणयोगेन
क्तेन च पूजायामपि साक्षादधिकरणवाचिना चैव
कर्मण्युत तृजकाभ्यां कर्तरि कर्तरि च केवलं साक्षात्
क्रीडाजीविकयोरपि नित्यं कुगतिप्रपूर्वकाश्च तथा
उपपदमतिङ् क्रमेण स्पष्टममैवाव्ययेन विज्ञेयम्
अपि च तृतीयाप्रभृतीन्यन्यतरस्यां ततःपरं कृत्वा च
शेषोऽर्थे बहुव्रीहिर्ह्यन्यपदार्थेऽपि केवलमनेकम्
अव्ययं निकटादूराधिकसंख्याः संख्ययैव संख्येये
संदेहरहितभावाद्दिङ्नामान्यंतराल एव तथा

BAI JERBAI WADIA LIBR.
FERGUSSON COLLEGE
D.E.S.
POONA NO.

तत्रं[३३] च तेनेदमिति स्वयं सरूपे यथायथं साक्षात्
तेनं[३४] सह तुल्ययोगे चार्थे[३५] द्वंद्व उपसर्जनं[३६] पूर्वम्
परमेव[३७] राजदंताद्येषु द्वंद्वे[३८] घ्यजाद्यदंतं[३९] च
अल्पाच्तरं[४०] विशेषणसप्तम्यौ केवलं बहुव्रीहौ
निष्ठैवं[४१] वाहिताग्निप्रभृतिष्वेवं यथावदवधार्यम्
तत एव कडारा[४२] अपि यथायथं कर्मधारये साक्षात्

---

## २–तृतीयः पादः

निःसंशयमनभिहिते कर्मणि[४३] केवलमियं द्वितीया स्यात्
होश्छंदसि[४४] च तृतीया युक्तें[४५] ध्रुवमंतरांतरेणैव
कालाध्वनोर्निरंतरसंयोगे सर्वथेति विज्ञेयम्
तदनंतरं यथायथमपवर्गे[४६] स्वयमसौ तृतीया स्यात्
कारकमध्ये सप्तम्यपि पंचम्येव केवलं स्पष्टम्
तत एव च द्वितीया[४७] स्यात्कर्मप्रवचनीययुक्त इयम्
यस्यापीश्वरवचनं[४८] यस्मादधिकं च सप्तमी तत्र
पंचम्याङपरिभिः[४९] केवलमित्यत्र नास्ति संदेहः
निःसंशयं प्रतिनिधिप्रतिदाने[५०] चैव केवलं यस्मात्
गत्यर्थकर्मणि[५१] यथायथं द्वितीया चतुर्थ्यपि स्पष्टम्

चेष्टायां चानध्वनि चतुर्थ्यर्थसौ संप्रदान एव स्यात्
स्थानिन एव व्यापृत्यर्थोपपदस्य कर्मणि यथावत्
भावववचनात्तुमर्थात्स्वास्तिस्वाहानमःप्रभृतियोगात्
तत एव मन्यकर्मण्यनादरेऽप्राणभृत्स्वपि विभाषा
कर्तृकरणयोरेव ध्रुवं तृतीया सहान्वितेऽप्रमुखे
येनांगविकास्तत एवेत्थंभूतलक्षणे साक्षात्
संज्ञो ऽन्यतरस्यामपि कर्मणि हेतौ यथायथं क्रमशः
पंचम्यसावकर्तर्यृणे विभाषा गुणेऽस्त्रियामेद
हेतुप्रयोग उत षष्ठ्येव तृतीया च सर्वनाम्नः स्यात्
तत एवापादाने पंचम्येषा स्वयं न संदेहः
इतरर्तेऽन्याराद्दिक्शब्दांचूत्तरपदप्रभृतियुक्ते
अपि षष्ठ्यतसर्थप्रत्ययेन तत एनपा द्वितीया स्यात्
नानाविनापृथग्भिर्त्यन्यतरस्यां भवेत्तृतीयैव
करणे कृच्छ्रकतिपयस्तोकाल्पस्याप्यसत्त्ववचनस्य
स्यादूरसमीपार्थैरन्यतरस्यामसंशयं षष्ठी
दूरसमीपार्थेभ्यस्तथा द्वितीया यथायथं स्पष्टम्
सप्तम्यधिकरणेऽपि च भावेन च भावलक्षणं यस्य
तदनंतरं यथावत् षष्ठी चानादरे भवेत्साक्षात्
स्वाम्यधिपतिदायादप्रतिभूसाक्षीश्वरप्रसूतैश्च
व्यापारितकुशलाभ्यामासेवायामिति स्वयं बोध्यम्

यत एव च निर्धारणमेषा पंचम्यथो विभक्ते स्यात्
अपि च निपुणसाधुभ्यां स्यात्सप्तम्यप्रतेस्तथाऽर्चायाम्
प्रसितोत्काभ्यां साक्षाद्धेवतृतीयैव लुपि च नक्षत्रे
प्रातिपदिकार्थमानव्यक्तिवचनमात्र एव च प्रथमा
संबोधने तथा सामंत्रितमेकवचनं च संबुद्धिः
षष्ठी शेषे केवलमविदर्थस्य ज्ञ एव करणे च
साऽधीगर्थदयेशां कर्मणि च कृत्यैः प्रतिप्रमुखयत्ने
तत एव रुजार्थानामुताज्वरेश्चैव भाववचनानाम्
आशिषि नाथो जासिप्रभृतीनां स्पष्टमेव हिंसायाम्
विशदतया व्यवहृपणोः समर्थयोरपि दिवस्तदर्थस्य
उपसर्गे च विभाषा यथायथं ब्राह्मणे द्वितीया स्यात्
प्रेष्यब्रुवोश्च हविषः स्याद्देवतसंप्रदान एव तथा
तत एव चतुर्थ्यर्थे बहुलं छंदसि यजेस्तथा करणे
साक्षात्कालेऽधिकरण उत कृत्वार्थप्रयोग इति बोध्यम्
अणि कर्तृकर्मणोः कृत्युभयप्राप्तौ च कर्मणि स्पष्टम्
क्तस्यापि वर्तमाने केवलमधिकरणवाचिनश्चैव
तत एव न लोकाव्ययखलर्थनिष्ठातृनामसंदेहम्
केवलमेवंकेनोर्भविष्यदधमर्णभावयोः साक्षात्
कृत्यानां कर्तरि वा साक्षादेवंतुलोपमाभ्यां च
केवलमन्यतरस्यामपि तुल्यार्थैरियं तृतीया स्यात्
भवति चतुर्थी चाशिष्यायुष्यसुखार्थभद्रकुशलहितैः

## २—चतुर्थः पादः

द्विगुरेकवचनमेव द्वंद्वस्तूर्यासुभृद्वलांगानाम्
अनुवादे चरणानामध्वर्युक्रतुरवश्यमक्लीबम्
अध्ययनत आसन्नाख्यानामप्राणिनामथो जातिः
साक्षाद्विशिष्टलिंगो भवति नदीदेश एव चाग्रामः
ते क्षुद्रजंतवः स्युर्येषां शाश्वतिक एव च विरोधः
स्पष्टमनिरवसितानां शूद्राणामपि गवाश्वमुख्यानि
अपि च विभाषा वृक्षव्यंजनपूर्वापराधरादीनाम्
अनधिकरणवाचि प्रतिषिद्धं न च दधिपयःपुरोगाणि
अधिकरणैतावत्त्वे ततो विभाषा समीप एव स्यात्
सँ नपुंसकं ततःपरमुताव्ययीभाव एव निर्णेयः
निःसंदेहतया तत्पुरुषोऽनञ्कर्मधारयः साक्षात्
तत्पश्चात्संज्ञायामपि कंथोशीनरेष्विति निबोध्यम्
स्पष्टमुपज्ञोपक्रममाख्यातुमिहेष्यते तदादिश्चेत्
छाया बाहुल्येऽपि च सभैव राजाऽमनुष्यपूर्वा स्यात्
तत एवाशाला च विभाषा सेनासुरापुरोगाणाम्
स्याद्द्वंद्वेतत्पुरुषयोः परवल्लिंगं न संशयोऽस्त्यत्र
तत एव यथायोगं पूर्ववदश्ववडवाविति निबोध्यम्
छंदसि चाहोरात्रे अपि हेमंतशिशिरावसंदेहम्
रात्राह्नाहाः पुंसि नपुंसकमपथं च पुंसि चार्धर्चाः

इदमोऽन्वादेशेऽशनुदात्तः केवलमयं तृतीयादौ
एतद एव त्रतसोस्त्रतसौ केवलमवश्यमनुदात्तौ
निःसंशयं द्वितीयाटौस्स्वेन उतोर्धधातुके साक्षात्
जग्धिरदो ल्यप्तिकिति स्पष्टं घसॢ लुङ्सनोस्तथा घञपोः
बहुलं छंदस्यपि लिट्यन्यतरस्यामथो वयिर्वेञः
तत एव हनो वध लिङि लुङि च यथायथमसंशयं स्पष्टम्
ध्रुवमात्मनेपदेष्वप्यन्यतरस्यामथो हणो लुङि गा
णौ गमिरबोधने स्यात्सनि चेङश्चैव केवलं लिटि गाङ्
अपि लुङ्लृङोर्विभाषा णौ साक्षात्संश्चङोस्तथाऽस्तेर्भूः
साक्षाद्ध्रुवो वचिः ख्याञ्चक्षिङ उतो लिट्यञ्जेर्व्यघञपोर्यौ
र्ण्यक्षत्रियार्षञित उत यूनि लुगणिञोरथो असंदेहम्
पैलादिभ्यश्चेञः प्राचां च ततो न तौल्वलिभ्यश्च
तद्राजस्यैव बहुष्वपि तेनैवास्त्रियामिति स्पष्टम्
यस्कादिभ्यो गोत्रे यञञोश्चेत्रिभृगुगौतमादिभ्यः
प्राच्यभरतेषु बहृच इञो नं गोपवनपूर्वकेभ्यश्च
अपि तिककितवादिभ्यो द्वंद्वे नास्त्यत्र संशयः कश्चित्
केवलमुपकादिभ्योऽप्यन्यतरस्यां तथैव च द्वंद्वे
अंगस्त्यककौंडिन्यकपदयोश्चागस्तिकुंडिनचैव
धातुप्रातिपदिकयोः सुपः शपोऽप्यदिपुरःसरेभ्यश्च
छंदसि बहुलमचि यङो यथायथं श्लुर्जुहोतिपूर्वेभ्यः

बहुलं छंदसि साक्षात्सिचः परस्मैपदेषु पादिभ्यः
केवलमेव विभाषा घ्राधेट्शाच्छास इति भवेद्विशदम्
तत एव तनादिभ्यस्तथा तथासोर्यथायथं साक्षात्
घसमुखरेभ्यो मंत्रे लेरामश्राप्सुपोऽव्ययादेव
अप्यमतोऽपंचम्या निःसंशयमेव नाव्ययीभावात्
बहुलं ततस्तृतीयासप्तम्योरेव केवलं साक्षात्
लुटि एव प्रथमस्य स्फुटमुत डारौरसो न संदेहः

इति द्वितीयोऽध्यायः ।

( आर्यासंख्या ७८ )

---

## अथ तृतीयाध्याये

### प्रथमः पादः

प्रत्यय एव परश्चाद्युदात्त उत केवलं न संदेहः
साक्षादनुदात्तौ सुप्पिताविति यथायथं परिज्ञेयम्
गोष्ठिज्किभ्यः सन्स्याद्धीर्घोऽभ्यासस्य मान्वधादिभ्यः
कर्मण इच्छायां वा स्फुटमेव समानकर्तृकाद्धातोः
सुप आत्मन एव क्यच् काम्यच्चाचार एवमुपमानात्

कर्तुः क्यङ् च सलोपो लोपोऽश्चेर्भुवि हलो भृशादिभ्यः
क्यँष् लोहितादिडाज्भ्यः कष्टाय क्रमण एव निःशंकम्
रोमंथतपोभ्यामपि यथायथं कर्मणश्च वर्तिचरोः
अथ बाष्पोष्मभ्यामुद्वमने कॅरणेऽभ्रशब्दमुखरेभ्यः
अपि कर्तृवेदनायां यथायथं केवलं सुखादिभ्यः
क्यँच्चैव नमोवरिवश्चित्रङ उत पुंच्छचीवरादेर्णिङ्
अपि मुंडमिश्रलवणव्रतहलकलकृतपुरःसरेभ्यो णिच्
धौतोरेव हलादेरेकाचो यङ् क्रियासमभिहारे
कौटिल्ये चैव गतौ लुंपमुखरेभ्यश्च भावगर्हायाम्
सत्यापपाशवीणालोमत्वचवर्मपूर्वकेभ्यो णिच्
हेतुमति च यॅकंडूप्रभृतिभ्यः केवलं न संदेहः
तत एवायः साक्षाद्धूपगुपूविच्छिपणिपनिभ्यश्च
ईयँङ्कृतेर्णिङ् च कमेरायादय आर्धधातुके वा स्युः
धौतव एवापि सनाद्यंता लृँलुटोः स्वयं स्यतासी च
सिब्बहुलं लेट्यिाम् लिट्येव च कास्प्रत्ययादमंत्रे स्यात्
अपि च गुरुमतोऽनृच्छः स्पष्टमिजादेस्तथा दर्यायासः
केवलमन्यतरस्यामुषविदजागृभ्य एव निःशंकम्
भीन्हीभृँहुवां श्लुवदपि लिटि कृञ्चानुप्रयुज्यते साक्षात्
अपि च विदांकुर्वित्यन्यतरस्यामसंशयं स्पष्टम्
अकॅ उत रमयांचिकयामप्यभ्युत्सादयांप्रजनयां च

छंदसि च विदामक्रन्यथायथं पावयांक्रियादिति च
च्लिलुङि च्लेः स्पष्टतया सिचि क्सः शल इगुपधादनिट एव
श्लिषि आलिंगे नौ दृशो णिश्रिद्रुस्रुभ्य एव कर्तरि चङ्
तत एव विभाषा धेट्श्व्योश्छंदस्यपि गुपेरसंदेहम्
अपि नोनयतिध्वनयत्येलयतिपुरःसरेभ्य एव ततः
ख्यात्यस्यतिवक्तिभ्योऽङ् साक्षात्तत एव लिपिसिचिह्नश्च
स्फुटमात्मनेपदेष्वप्यन्यतरस्यां यथायथं साक्षात्
अपि च परस्मैपदसंज्ञेषु पुषादिद्युताद्यृलृदित एव
सत्यर्त्यनुशास्तिभ्यः स्फुटमिरितो वा ततः क्रमेणैव
जृस्तंभुम्रभृतिभ्यः क्र्यादिभ्यश्छंदसि च पदश्चिण् ते
अन्यतरस्यामपि जनदीपबुधप्यायितायिपूरिभ्यः
अच एव कर्मकर्तरि दुहश्च न रुधस्तपोऽनुतापे च
चिण् भावकर्मणोरपि यथायथं सार्वधातुके यक् च
स्पष्टतया कर्तरि शप् श्यन्नेव ततः परं दिवादिभ्यः
वा भ्राशम्लाशभ्रमुपुरःसरा उत यसोऽप्यनुपसर्गात्
तत एव संयसश्च स्वादिभ्यः श्नुः श्नुवः शृ च स्पष्टम्
अक्षोऽन्यतरस्यामपि तनूकरण एव केवलं तक्षः
शश्च तुदादिभ्यः श्नं रुधमुखरेभ्यस्तेनादिकृञ्भ्योऽप्युः
तत एव धिन्विकृण्व्योर च साक्षात्क्रीपुरःसरेभ्यः श्ना
स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यो यथायथं श्नुश्च

श्नाः शानज्झौ च हलः साक्षादेवेति सम्यगवगम्यम्
छंदसि शायजपि व्यत्ययो बहुलमेव केवलं स्पष्टम्
पश्चाल्लिङ्याशिष्यङ् तुल्यक्रिय एव कर्मवत् क्रियया
अपि निःसंदेहतया तपस्तपःकर्मकस्य तत एव
नं दुहस्नुनमां साक्षाद्यथायथं यक्चिणाविति ध्येयम्
प्राचां च कृषिरजोः श्यन्नेव परस्मैपदं तथा धातोः
क्रमशोऽथ सप्तमीस्थं तत्रोपपदं भवेत्ततः कृदतिङ्
तत एव वासरूपोऽप्युतास्त्रियां प्राङ् ण्वुलस्तथा कृत्याः
तव्यत्तव्यानीयर एवाचो यदपि पोरदुपधाच्च
साक्षादेव शकिसहोरुत गदमदचरयमोऽप्यनुपसर्गे
पण्यावद्यप्रमुखाः साक्षात्पणितव्यगर्ह्यमुखरेषु
साक्षाद्वह्यं करणं तत एव स्वामिवैश्ययोर्यः
अप्युपसर्या काल्या प्रजने संगतमजर्यमेव तथा
तत एव वदः क्यप्सुपि भावे भुव उत हनस्त च क्रमशः
एतिस्तुशास्वृदृजुषः क्यप् साक्षात्केवलं न संदेहः
स्पष्टमृदुपधाच्चाकृपिचृतेश्च खन ई भृञोऽप्यसंज्ञायाम्
साक्षान्मृजेर्विभाषाऽप्युत सूर्यमृषोद्यराजसूयाद्याः
भिद्योद्यौ चापि नदे नक्षत्रे चैव पुष्यसिध्यौ स्तः
जित्यविपूयविनीया विशदतयैव हलिमुंजकल्केषु
छंदस्यपिप्रतिभ्यां ग्रहेः पदास्वैरिपक्ष्यबाह्यासु

अपि च विभाषा कृवृषोः पत्रे [१२३]युग्यं च केवलं स्पष्टम्
[१२३]अन्यतरस्यां चामावस्यच्छंदासि [१२३]च देवहूयादि
[१२४]ऋहलोर्ण्यदेव केवलमोरावश्यक उतासुयुवपिमुखाः
[१२७]आनाय्योऽनित्येऽसंमतौ [१२८]प्रणाय्योऽप्यसंशयं साक्षात्
[१२९]पाय्यनिकाय्यप्रभृतिष्वपि [१३०]क्रतौ कुंडपाय्यसंचाय्यौ
निःसंशयमेवाग्नौ समूह्यपरिचाय्यसमुपचाय्याश्च
[१३२]चित्यानलचित्ये [१३३]ण्वुल्तृचौ [१३४]ल्युणिन्यच उत ग्रहिमुखेभ्यः
[१३५]कः इगुपधज्ञाप्रीकिर एवातश्चोपसर्ग इति बोध्यम्
[१३७]पाघ्राध्माधेड्दृश उत शोऽनुपसर्गात्तथव लिंपादेः
[१३९]पदेदातिदधात्योश्च विभाषा [१४०]णश्च ज्वलितिकसंतेभ्यः
[१४१]ईर्ष्याव्यधसंरुवारुववसावहश्लिषातीण्लिहश्वसश्चव
[१४३]दुन्योश्चानुपसर्गे [१४४]ग्रहोविभाषा [१४५]कः एव गेहे च
तत एव शिल्पिनि [१४५]ष्वुन्यथायथं केवलं भवेत्स्पष्टम्
स्फुटमेव [१४८]गस्थकन् [१४९]ण्युट् ततः परं व्रीहिकालयोर्हश्च
[१५१]वुन् समभिहार एव प्रसृत्व [१५२]आशिषि च केवलं स्पष्टम्

---

## ३—द्वितीयः पादः

[१]कर्मण्यण् [३]द्वावामोऽप्यातोऽनुपसर्ग एव कः स्थः स्यात्
[५]सुपि च परिमृजापनुदोर्यथायथं तुंदशोकयोरेव

प्रेदाज्ञश्च सँमिरूयो गोपोष्टक् च हरतेरनुद्यमनेऽच्
वयसि च ताच्छील्ये ह्याङ्यहः केवलमसंशयं स्पष्टम्
स्यात्स्तंबेकर्णयोरमिजपोश्च धातोः शमीह संज्ञायाम्
अधिकरणे शेतेष्टश्वरेस्तथा केवलं न संदेहः
साक्षाद्भिक्षासेनादायेषु यथायथं परिज्ञेयम्
सेतेः पुरोऽग्रतोऽग्रेष्वपि कर्तरि पूर्व एव निःशंकम्
तत एव केवलं कृञ उत ताच्छील्यानुलोम्यहेतुषु च
साक्षाद्दिवाविभाभास्करप्रभाहर्निशाप्रभृतिषु तथा
कर्मणि भृतौ न शब्दश्लोककलहसूत्रमंत्रमुखरेषु
स्तंबेशकृतोरथो इन् हरतेर्दतिनाथयोः पशावेव
आत्मंभरिः फलेग्रहिरेवं छंदसि वनसनरक्षिमथाम्
एजेरपि खश् साक्षाद् ध्मोधेटोरेव नासिकास्तनयोः
नाडीमुष्टयोः कूले ह्युदि च रुजिवहोर्वहाभ्र एव लिहः
परिमाणे च पचो मितनखे तुदः केवलं च विध्वरुषोः
साक्षाद् दृशेस्तपश्च क्रमादसूर्ये ललाट एव तथा
तत एवोग्रंपश्येरंमदपाणिंधमा अपि निबोध्याः
वद एव खच् प्रियवशे तापेरपि केवलं द्विषत्परयोः
वाचि व्रते यमः स्यात्साक्षात्पूःसर्वयोश्च दारिसहोः
तत एव सर्वकूलाभ्रकरीषेष्वपि कषः स्वयं स्पष्टम्
मेघर्तिभयेषु कृञः क्षेमप्रियमद्र एव केवलमण्

अपि करणभावयोर्भुव आशित इति निश्चयेन विज्ञेयम्
संज्ञायामेव भृतृवृजिसहितापिधारिदम उत गमश्च
डः साक्षात्सर्वातात्यंतानंताध्वदूरपारेषु
तत एव च हन आशिष्यपे तमः क्लेशयोरसंदेहम्
तदनंतरं स्फुटतया णिनिरेवं कुमारशीर्षयोश्चापि
जायापत्योष्टक्स्याल्लक्ष्मण्यमनुष्यकर्तृके चैव
सुस्पष्टतया शक्तावपि हस्तिकपाटयोर्यथायोगम्
तदनंतरं च शिल्पिन्यपि पाणिघताडघावसंदेहम्
ऑढ्यसुभगप्रभृतिषु च्व्यर्थेष्वच्वौ कृत्रश्च करणे ख्युन्
खिष्णुच्खुकञौ कर्तरि भुवः स्पृशोऽप्यनुदके तथैव क्विन्
ऋत्विग्दधृक्स्रग्गुष्णिक्सहितानामंचुदिग्युजिक्रुंचाम्
साक्षाच्च्यंदादिषु तथा स्पष्टमनालोचने दृशः कं च
सत्सूद्विषद्रुहदुहभृतीनां क्विप् तथोपसर्गेऽपि
तत एव भंजो ण्विः स्याच्छंदसि सह एव केवलं च वहेः
ण्युट् कव्यपुरीषादिषु हव्येऽनंतो यथायथं पादम्
जनसनखनक्रमगमो विडदोऽनन्ने तथैव च क्रव्ये
कव्यश्च दुहो मंत्रे ण्विन् श्वेतवहोक्थशस्पुरोडाशः
अव एव यजो विजुपे छंदस्यातो मनिन्क्वनिब्वनिपः
दृश्यंतेऽन्येभ्योऽपि क्विप् च स्थः क च यथायथं साक्षात्
णिनिरेवं सुप्यजातौ ताच्छील्ये कर्तरीष्टे उपमाने

व्रँत आभीक्ष्ण्ये बहुलं साक्षान्मने एव चात्मनाने खः
भूते करणे च यजः कर्मणि हन एव केवलं स्पष्टम्
ब्रह्मभ्रूणादौ क्विब् बहुलं छंदस्यसंशयं चैवम्
साक्षात्सुकर्मंमंत्रप्रभृतिषु च कृञः सुञस्तथा सोमे
अग्नौ चेः कर्मण्यध्याख्यायां विक्रियं इनि कर्मणि च
क्वनिबेव दृशे राजनि कृञो युधि सहे च केवलं स्पष्टम्
सप्तम्यां हि जनेर्डः पंचम्यामेव केवलमजातौ
उपसर्गे संज्ञायामनौ हि कर्मणि च दृश्यतेऽन्येषु
निष्ठा सुयजोर्ङ्वनिबपि तत्पश्चाज्जीर्यतेरतॄन् साक्षात्
छंदसि लिट् कानज्वा लिटः कसुश्चेत्यसंशयं स्पष्टम्
साक्षाद्भाषायां सदवसश्रुवः सर्वेथेति विज्ञेयम्
केवलमुपेयिवाननाश्वानथो अनूचानः
लुङ्नद्यतने लङभिज्ञावचने लृट् तथा न यदि साक्षात्
साकांक्षे हि विभाषा लिट् च परोक्षे हशश्वतोर्लङ् च
आसन्नकाल एव प्रश्ने लट् स्मेऽपरोक्षे एव तथा
अपि पृष्टप्रतिवचने ननौ विभाषा यथायथं नन्वोः
पुरि लुङ् चास्मे साक्षात्तदनंतरमेव वर्तमाने लट्
अप्रथमासामान्याधिकरण्येऽपि शतृशानचौ च लटः
संबोधने क्रियाया लक्षणहत्वोश्च तौ सदैव तथा
शानन्नहि पूङ्यजोस्तोच्छील्यवयोवचनशक्तिषु च चानश्

इह शत्रौ[१३०] कृच्छ्रिणि ध्रुवमथो इधार्योर्द्विषस्तथाऽमित्रे[१३१]
सुञ्[१३२] उते मखसंयोगे केवलमर्हः[१३३] स्वयं प्रशंसायाम्
तदनंतरमप्यर्थे वेस्तच्छीलप्रभृतयस्ततस्तृन्[१३५] स्यात्
केवलमेवालंकृञ्निराकृञुत्पतपुरःसरेष्विष्णुच्[१३६]
णेश्छंदसि[१३७] च भुवश्च[१३८] ग्लाजिस्थश्च[१३९] ग्स्नुरेव निःशंकम्
त्रासिगृधिधृषिक्षिपेः क्नुस्ततो धिनुण्[१४१] शमपुरःसराष्टाभ्यः
संपृचपरिदेविपरिक्षिपपरिरटपरिवदप्रभृतयश्च
वावपि कषलसकत्थस्नंभोऽपे[१४४] च लष इत्यसंदेहम्
स्नुलषमथद्रुवदवसः प्रे निंदक्लिशपुरःसरेभ्यो वुञ्[१४६]
उपसर्गे क्रुशदेर्व्योरर्कमकाद्युजपि चलनशब्दार्थात्
तत एव हलादेरनुदात्तेतः केवलं न संदेहः
जुसृगृधिचंक्रम्यज्वलशुचलषदंद्रम्यपतपदः साक्षात्
क्रुधमंडार्थेभ्यो नयं उत साक्षात्स्नुददीपदीक्षश्च
स्थालषपतपदभूवृषहनकमगमशृभ्य एव विशदमुकञ्
अपि जल्पाभिक्षकुट्टप्रभृतेः षाकन्प्रजोरिनिः साक्षात्
तदनु परिभूक्षिविश्रीण्वमाव्यथाभ्यमजिदप्रसूभ्यश्च
स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आलुजेव तथा
दाधेट्शिशदेसदो रुः सेधस्यदः क्मरजथो असंदेहम्
मिदभंजभास एव च घुरच् कुरज्विदिभिदिच्छिदेः स्पष्टम्
जीर्णशसर्तिभ्यः क्वरबपि गत्वर एव जागरूकश्च

यजजपदशां यङो नमिकंपिस्म्यजसकमहिंसदीपो रः
उश्च सनादेरिच्छुर्बिदुः क्यँाच्छंदसि स्वयं स्पष्टम्
लिट् चाद्गमहनजनः किकिनौ च स्वपितृषोर्नजिङ् साक्षात्
शृवंद्योरारुः कुकुकनौ भिय इत्यसंशयं ध्येयम्
भासंस्थेशपिसकसो वरज्यँङो यश्च केवलं विशदम्
भ्राजग्रावस्तुवित्युतोर्जिधुर्भासपृजुवश्च क्विप्
अन्येभ्यो दृश्यत उत संज्ञांतरयोर्भुवो न संदेहः
तत एव विप्रसंम्भ्यो यथायथं केवलं ड्वसंज्ञायाम्
धः कर्मण्येव ष्ट्रन्केवलमेव स्वयं सुविज्ञेयम्
दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनह उत करणे
हलसूकरयोश्च पुवो लूधूसूखनसहार्तिचर इत्रः
पुवः एव च संज्ञायामृषिदेवतयोश्च कर्तरि स्पष्टम्
क्रीतः क्तो मतिपूजाबुध्यर्थेभ्यश्च केवलं साक्षात्

---

## ३—तृतीयः पादः

साक्षादुणादय इमे बहुलं भूते तथैव दृश्यंते
गम्यादयो भविष्यति लँट् च पुराख्य उत यावति निपाते
अपि च विभाषैव कदाकर्ह्योः किंवृत्त एव लिप्सायाम्
अथ लिप्स्यमानसिद्धौ साक्षाल्लोर्डर्थलक्षणे चैव

तत एव यथार्थतया लिङूर्ध्वमौहूर्तिके न संदेहः
साक्षात्तुमँन्ण्वुलौ च स्फुटं क्रियायामपि क्रियार्थायाम्
भाववचनाश्च कर्मण्यण् शेषे लृट् तथा लृटः सद्वा
लुडनद्यतने परुजविशस्पृशो घञ् स्थिरे सृ भावे च
कारक उत संज्ञायामकर्तरि च केवलं न संदेहः
परिमाणाख्यायामपि सर्वेभ्यश्चैव केवलमिङश्च
रुवँ उपसर्गे सामि युद्रुदुवो नीभूश्रियोऽप्यनुपसर्गे
वौ क्षुश्रुवोऽप्येवोदोर्नियस्तथा द्रुस्तुसंस्रुवश्च प्रे
पूर्वोरेव निरभ्योरुन्नयोर्ग्रो धान्य एव कृ साक्षात्
यज्ञे सामिस्तुवःप्रे स्त्रोऽयज्ञेऽशब्द एव वौ प्रथने
छंदोनाम्नि च साक्षादुदि ग्रहः स्पष्टमेव सामि मुष्टौ
नीणोरेवँ परिन्योरुत व्रताभ्रेषयोरसंदेहम्
अनुपात्यये पराविण उपे उत शेतेश्च वौ च पर्याये
चेरस्तेये हस्तादाने ह्यादेश्च को निवासादौ
तदनंतरं यथावत्संघे केवलमनौत्तराधर्ये
कर्मण्यतिहारे णच् स्त्रियामभिविधौ तथैव भाव इनुण्
ग्रहे आक्रोशेऽवन्योः प्रे लिप्सायां ततः परौ यज्ञे
तत एव नौ वृ धान्येऽप्युदि श्रयतियौतिपूर्व इत्येव
अपि रुलुवोर्विभाषा ङ्यवे ग्रहश्चैव वर्षसंरोधे
प्रे वणिजामपि रेरमावाच्छादन एवमेव च वृणोतेः

साक्षात्परौ भुवोऽवज्ञाने ह्वेरज्यथायथमृदोरप्
ग्रहिवृदृनिश्चिगमश्चाप्युपसर्गेऽदश्च नौ णं च स्पष्टम्
अपि चानुपसर्गे व्यधजपोश्च तदनंतरं स्वनहसोर्वा
समुपनिविषु च यमो नौ गंदस्वनादि क्वणश्च वीणायाम्
नित्यं परिमाणे पण एवं साक्षान्मदाङ्यनुपसर्गे
हर्षे च प्रमदः संमदोऽपिसमुदोरजस्तथा पशुषु
अक्षेषु ग्लह एव प्रजने सर्तेरसंशयं साक्षात्
ह्वः संप्रसारणं च न्यभ्युपविष्वाङि केवलं युद्धे
आहावस्तु निपानं भावे निःशंकमनुपसर्गस्य
हन एव वधो मूर्तौ घनस्तथांऽतर्घनः स्वयं देशे
प्रघणः प्रघाण एव स्पष्टमगारैकदेश इति बोध्यम्
अत्याधानं चोद्घन एषोऽपघनोंऽगमेव तत्पश्चात्
करणेऽयोविद्रुषु च स्तंबे कं च घः परौ न संदेहः
आश्रय उपघ्न उत संघोदघौ च गणप्रशंसयोरेव
निमितं निघो ड्वितः क्रिः ष्ट्रितोऽप्यथुच् केवलं न संदेहः
यजयाचरक्षविच्छप्रच्छयतो नङ् स्वपश्च नन् साक्षात्
उपसर्गे किर्घोरधिकरणे कर्मण्युत स्त्रियां क्तिन् स्यात्
भावे स्थागापाद्या मंत्रे उदात्तस्तथा वृषादिभ्यः
अप्यूतियूतिजूतिप्रमुखा भावे यजत्रजोः क्यप् च
संज्ञायां चैव समजनिषदनिपतमुक्षमनविदशीङ्भृञिणः

साक्षात्कृञः श चेच्छा पश्चाद् अं प्रत्ययाद्गुरोश्च हलः
षिद्भिदादिभ्योऽङपि चिंतिसुपूजिकथिकुंबिचर्चश्च
उपसर्गे ह्यासश्च ण्यासश्रंथश्च युच् क्रमेणैव
रोगाख्यायां बहुलं ण्वुल् संज्ञायां ततः परं साक्षात्
केवलमेव विभाषाख्यानपरिप्रश्नयोरथो इञ्च
अप्यर्हणपर्यायोत्पत्तिषु च ण्वुच् ततः परं क्रमशः
नञ्यनिराकोशेऽपि च बहुलं कृत्यल्युटो न संदेहः
भावे नपुंसके क्तो ल्युट् चेति यथायथं परिज्ञेयम्
कर्मणि च येन कर्तुः संस्पर्शात्केवलं शरीरसुखम्
करणाधिकरणयोश्च प्रायेण घ एव पुंसि संज्ञायाम्
निगमापणव्यजव्रजवहसंचरगोचराश्च तत एव
तृस्त्रोरवे च घञ् हल औध्यायन्यायपूर्वकाश्चैव
अनुदक उदंक एवानायो जालं खनो घ च स्पष्टम्
अपि कृच्छ्राकृच्छ्रार्थेष्वीषद्दुःसुषु तथैव खल् साक्षात्
स्यात्कर्तृकर्मणोर्भूकृञोश्च साक्षाद्यथावदीतो युच्
छंदसि गत्यर्थेभ्यः स्फुटमन्येभ्योऽपि दृश्यते क्रमशः
स्याद्वर्तमानवद्वा यथायथं वर्तमानसामीप्ये
भूतवदाशंसायां क्षिप्रवचन एव लृट् तथा स्पष्टम्
केवलमेवाशंसावचने लिङ् स्यादिति ध्रुवं बोध्यम्
नानद्यतनवदेव प्रबंधसामीप्ययोः क्रियायाश्च

अवरस्मिन्मर्यादावचने च भविष्यति क्रमेणैव
कालविभागेऽप्यनहोरात्राणामेव केवलं साक्षात्
तदनंतरं परस्मिन् भवेद्विभाषेति सम्यगवगम्यम्
तत एव लिङ्निमित्ते यथायथं लृङ् क्रियातिपत्तौ स्यात्
भूते वोताप्योरपि गर्हायां केवलं लडपिजात्वोः
लिङ् च विभाषैव कथमि किंवृत्ते लिङ्लृटौ न संदेहः
क्रमेशोऽकिंवृत्तेऽपि स्पष्टमनवक्लृप्त्यमर्षयोरेव
तत एव किंकिलास्त्यभिधेयेष्वपि लृङ् लिङेव जातुयदोः
स्याद्यत्रयत्रयोरपि गर्हायां केवलं न संदेहः
साक्षाच्चित्रीकरणे शेषेऽपि च लृडयदौ क्रमादेव
तत एवोताप्योरपि समर्थयोर्लिङ् न संशयोऽस्त्यत्र
कामप्रवेदने स्फुटमकच्चितीति ध्रुवं परिज्ञेयम्
संभावनेऽलमिति चेत्साक्षात्सिद्धाप्रयोग एव स्यात्
धातावपि संभावनवचनेऽयदि केवलं विभाषैव
तदनंतरं यथावल्लिङ् केवलमेव हेतुहेतुमतोः
लिङ्लोटाविच्छार्थेष्वपि चैव समानकर्तृकेषु तुमुन्
लिङ् चेच्छार्थेभ्योऽपि स्फुटं विभाषैव वर्तमाने स्यात्
प्रश्नाधीष्टप्रार्थनविध्यामंत्रणनिमंत्रणेषु च लिङ्
लोडतिसर्गप्रैषप्राप्तावसरेषु केवलं कृत्याः
तदनंतरं यथावल्लिङूर्ध्वमौहूर्तिके न संदेहः

स्मे[१९५] लोट् च[१९६] धीष्टे च स्फुटं तुमुन् समयकालवेलासु
लिङ्[१९८] यदि कृत्यतृचोऽर्हे णिनिर्[१९९] वश्यक उताधमर्ण्ये स्यात्
कृत्या लिङ्[२००] शक्यार्थशिषि लिङ्लोटौ क्तः क्तिचौ[२०१] च संज्ञायाम्
तत एव माङि[२०२] लुङ् स्याद्यथायथं स्मोत्तरे[२०३] ध्रुवं लङ् च

---

## ३—चतुर्थः पादः

धातोः संबंधे प्रत्यया भृशार्थे च लोट् तथा लोटः
हिस्वौ च तध्वमोर्वाऽप्यन्यतरस्यां समुच्चये साक्षात्
तदनंतरं यथाविध्यनुप्रयोगस्तथैव पूर्वस्मिन्
साक्षादेव समुच्चय उत सामान्यवचनस्य निःशंकम्
छंदसि लुङ्लङ्लिट उत लेट्च लिङर्थे न संशयोऽस्त्यत्र
केवलमाशंकायामुपसंवादे तथैव विज्ञेयम्
सेसेनसेअसेन्क्से तवैतवेङ्प्रभृतयस्तुमर्थे स्युः
साक्षात्तथाऽऽध्यथिष्यै रोहिष्यै च प्रयै[२११] दृशे विख्ये
शक्येव[२१२] णमुल्कमुलौ तोसुन्[२१३]कसुनावपीश्वरे साक्षात्
कृत्यार्थेऽथ[२१४] तवैकेन्केन्यत्वन एव चावश्चक्षे[२१५] च
स्यात्स्थेण्[२१६]कृञ्वदिचरितमिहुजनिभ्यो भावलक्षणे तोसुन्
अपि स्तोपितृदोः कसुन् स्यात्[२१७] त्वाऽलंखल्वोर्निषेधयोः प्राचाम्
माङ उदीचां च व्यतिहारे योगे[२२०] तथा परावरयोः

तत एव [३१]पूर्वकाले निःसंदेहं समानकर्तृकयोः
[३३]औभीक्ष्ण्ये च णमुल् स्या[३३]न्न यद्यनाकांक्ष एव निःशंकम्
प्रथ[३४]माग्रेपूर्वेषु वि[३५]भाषा कर्मणि कृञः खमुञ् क्रोशे
साक्षात्तत एव ण[३६]मुल् स्वादुमि केवलमिति ध्रुवं बोध्यम्
अ[३७]प्यन्यथैवमित्थंकथंसु सिद्धाप्रयोग एवं चेत्
तत एवा[३८]सूयाप्रतिवचने च यथायथं यथातथयोः
[३९]कर्मणि साकल्ये दृशिविदोश्च [४०]यावति च विंदजीवोः स्यात्
[४१]चर्मोदरयोः पूरेरिति क्रमेणैव केवलं स्पष्टम्
[४२]अस्यान्यतरस्यामूलोपो वर्षप्रमाण एव स्यात्
चेले[४३] क्नोपेः साक्षात्[४४]क्षेपो निमूले तथा समूलेऽपि
अपि [४५]शुष्कचूर्णरूक्षेष्वेव विषः केवलं न संदेहः
ह[४६]न्कृञ्ग्रहः समूलाकृतजीवेष्वप्यसंशयं साक्षात्
क[४७]रणे हनः पिषोऽपि [४८]स्नेहन एवेति सम्यगवगम्यम्
[४९]वार्तिग्रहोश्च हस्ते स्वे[५०] च पुषोऽधि[५१]करणे तथा बंधः
संज्ञायां [५२]कर्त्रोर्नशिवहोस्तथा जीवपुरुषयोरेव
[५३]ऊर्ध्वे शुषिपूरोरु[५४]पमाने कर्मणि च केवलं स्पष्टम्
साक्षात्[५५]क्षेपादिषु यथायथं यथाविध्यनुप्रयोगश्च
निःशंकमेव केवल[५६]मुपदंशोऽपि स्वयं तृतीयायाम्
साक्षाद्धि[५७]सार्थानां स्फुटमेव समानकर्मकाणां च
तत एव च स[५८]म्यामप्युपपीडरुधकर्ष एव तथा

स्पष्टं च समाँसत्तौ प्रमाँण एवेति सम्यगवधेयम्
तत एवापाँदाने सुपरीप्सायां तथा द्वितीयाँयाम्
स्वाँंगेऽध्रुवे निरंतरमेव पाँरिक्लिश्यमान इति बोध्यम्
विशिपाँतिपुरःसराणां पौनःपुन्ये तथैव संव्याप्तौ
अँस्यतितृषोः क्रियांतर उत कालेष्वाँदिशिग्रहोर्नाम्नि
काँत्वाणमुलावयथाभिप्रेताख्याने कृत्योऽव्यये साक्षात्
अपि तिर्यच्यपवर्गे स्वांगे तस्प्रत्यये तथा कृभ्वोः
च्व्यर्थे नाधार्थप्रत्यये च तूष्णीमि भुव इति स्पष्टम्
अन्वच्युतानुलोम्ये तुमुन् भवेच्छकपुरःसरेष्वेव
निःसंशयमलमर्थेष्वपि पर्याप्तिवचनेषु कर्तरि कृत्
स्युर्भव्याप्ताद्योपस्थानीयप्रवचनीयमुखरा वा
लेः कर्मणि भावे चाप्यकर्मकेभ्यस्ततः परं साक्षात्
कृत्यक्तखलर्था अपि यथायथं केवलं तयोरेव
स्यादादिकर्मणि क्तः कर्तर्यपि नात्र संशयः कश्चित्
गत्यर्थाकर्मकशीङ्वसश्लिषस्थासजीर्यतिभ्रुखेभ्यः
तत एव दाशगोघ्नावसंशयं संप्रदान एव स्तः
भीमादयस्तथापादाने ताभ्यामुणादयोऽन्यत्र
ध्रौव्यगतिप्रत्यवसित्यर्थेभ्योऽधिकरणे क्त उत लस्य
आदौ तिपस्तस्झिसिबपि तदनंतरमेव थस्थमिव्वस्मस्
अंते तातांझसमन्वितथासाथांध्वमिड्वहिमहिङ् च

टितः आत्मनेपदानां टेरे स्थांसः स एव निःशंकम्
तत एव लिटस्तझयोः साक्षादेवेशिरेजिति ध्येयम्
क्रमशो णलप्रभृतयः स्फुटं परस्मैपदाभिधानां च
विदः एव लटो वा ब्रुव आदित आहोब्रुवश्च पंचानाम्
लोटो लङ्वत्केवलमेरुस्तत एव सेर्ह्यपिच्चापि
वा छंदसि मेर्निरुतामेतो वामौ तथा सर्वाभ्यां च
ओडुत्तमस्य पिच्चाप्यै चैतो लेटः एव चाडाटौ
ऐ चातोऽन्यत्रैतो वैष परस्मैपदेष्वितो लोपः
साक्षात्स उत्तमस्य स्पष्टं नित्यं ङितस्तत इतश्च
तस्थस्थमिषां ताम्तम्तामः सीयुट् क्रमेण चैव लिङः
यासुड् ङिच्च परस्मैपदेष्वथोदोत्त आशिषि किदेव
झस्य रेरनिटोऽत्तिथोः सुड्झेर्जुस् सिज्विदिपुरः सरादितः
अपि शाकटायनस्य स्फुटं लङः केवलं द्विषश्चैव
तिङ्शित्सार्वधातुकमर्धधातुकमुतैष शेषो लिट्
साक्षादेवाशिषि लिङ् छंदस्यप्युभयथा न संदेहः

इति तृतीयोऽध्यायः ।

( आर्यासंख्या १६५ )

# अथ चतुर्थाध्याये

## प्रथमः पादः

अथ निःसंदेहतया स्यान्ङ्याप्प्रातिपदिकादिति निबोध्यम्
आर्याऽग्रिमा विभक्तिप्रत्ययवाचिन्यवेक्षणीयाऽऽर्यैः
स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसि क्रमेणैव
भ्यांभ्यस्तथा ङसोसाम्ङ्योस्सुबिति प्रत्यया विभक्तीनाम्
साक्षात्स्त्रियां ततः परमजाद्यतष्टाबसंशयं स्पष्टम्
ङ्याभ्यो ङीर्बुगितो वनो र च तथैव केवलं साक्षात्
पादोऽन्यतरस्यामपि टाबृच्येव नात्र संदेहः
नं च षट्स्वस्रादिभ्यो मनो यथायथमनो बहुव्रीहेः
तत एव ङाबुभाभ्यामन्यतरस्यां च केवलं स्पष्टम्
अप्यनुपसर्जनादिति निःसंदेहं सुधीभिरवधेयम्
इह टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्समायुक्ताः
ठक्ठञ्कञ्क्रपः स्युर्यथायथं प्रत्यया यञ्श्चैव
प्राचां ष्फस्तद्धित उत नित्यं लोहितमुखरकतंतेभ्यः
स्यात्कौरव्यसमाह्वयमांडूकाभ्यां वयस्यपि प्रथमे
साक्षाद्द्विगोरुतापरिमाणादिभ्यो न तद्धितलुकि स्यात्
क्षेत्रे कांडांतादप्यन्यतरस्यां प्रमाण उत पुरुषात्
ङीषूधस एव बहुव्रीहेः साक्षान्न संशयोऽस्त्यत्र

अव्ययसंख्यादेर्ङीब्यथायथं दोमहायनाताच्च
केवलमन्यतरस्यामन उपधालोपिनः क्रमेणैव
नित्यं यथायथं स्यादपि संज्ञोछंदसोरसंदेहम्
केवलमामकपापप्रभृते रात्रेस्तथाऽजसौ साक्षात्
नुक् चाप्यंतर्वत्पतिवतोश्च पत्युर्न इष्टसंयोगे
तत एव सपूर्वस्य विभाषा नित्यं तथा सपत्न्यादौ
पूतक्रतोरथो ऐ ह्युदात्त एव च वृषाकपिमुखानाम्
औ वा मनोश्च वर्णादनुदात्तात्तोपधाद्ध्वेत्तो नः
ङीष् अन्यतस्तथैव च षिद्गौरादिभ्य एव निःशंकम्
जानपदकुंडगोणस्थलभाजनकामुकादिषु स्पष्टम्
शोणात्प्राचां वोतो गुणवचनाद्ध्रस्वपुरःसरेभ्यश्च
नित्यं छंदसि भुव उत पुंयोगात्केवलं तथाऽऽख्यायाम्
इंद्रवरुणभवरुद्रप्रभृतीनां केवलं भवेदानुक्
क्रीतांच्च करणपूर्वादल्पाख्यायां यथावदेव क्तात्
अंतोदात्ताच्च बहुव्रीहेर्वा प्राक्पदादुतास्वांगात्
स्वांगमसंयोगोपधमुपसर्जनमेव यच्च तस्मात्स्यात्
तत एव नासिकौष्ठोदरजंघादंतकर्णशृंगाच्च
क्रोडादिबह्वचो न स्यात्सहनञ्विद्यमानपूर्वाच्च
संज्ञायां च नखमुखाच्छंदस्यपि दीर्घजिह्वयसंदेहम्
दिक्पूर्वपदान्ङीबपि वाहोऽशिश्वीसखीति भाषायाम्

जातेरस्त्रीविषयादयोपधात्फलमुखोत्तरपदाच्च
मानुषजातेरित उत ऊङ् बाह्वंतात्तथैव संज्ञायाम्
तत एव स्यात्पंगोरप्यूरूत्तरपदात्तथौपम्ये
अपि संहितशफलक्षणवामादेश्चैव केवलं स्पष्टम्
कद्रुकमंडल्वोरपि साक्षाच्छंदसि तथैव संज्ञायाम्
शार्ङ्गाद्यञ उत ङीन्यङ आबेव क्रमेण चौवठ्यात्
तत एव तद्धिता अपि यथायथमनुक्रमेण यूनस्तिः
अणिञोश्चैव गुरूपोत्तमयोश्चानार्षयोश्च गोत्रे ष्यङ्
गोत्रावयवादेव क्रौड्यादिभ्यश्च केवलं साक्षात्
अन्यतरस्यां कांठेविद्धिप्रभृतिभ्य एव निःशंकम्
तत एव समर्थानां प्रथमाद्वा प्राक् च दीव्यतोऽण् स्पष्टम्
साक्षादेवाश्वपतिप्रभृतिभ्यः केवलं न संदेहः
तत एव दित्यदितिपत्यादित्योत्तरपदाण्ण्य एव स्यात्
केवलमुत्सादिभ्योऽञ् स्त्रीपुंसाभ्यां च नञ्स्नञौ भवनात्
साक्षादनपत्ये लुग् द्विगोश्च गोत्रेऽप्यलुगचि लुंग्यूनि
तत एव फक्फिञोरप्यन्यतरस्यामपत्यमुत तस्य
केवलमेको गोत्रे गोत्राद्यून्यस्त्रियां क्रमादैत इञ्
बाह्वादिभ्यः साक्षादकङ् सुधातुर्न संशयोऽस्त्यत्र
गोत्रे कंजादिभ्यश्फञ् स्पष्टं फक्त्था नडादिभ्यः
अपि हरितादिभ्योऽञः साक्षाद्यञिञोश्च केवलं स्पष्टम्

आग्रायणवत्सभृगुष्वपि दर्भशुनकशरद्वतश्चैव
केवलमन्यतरस्यां जीवंतद्रोणपर्वतादेव
बिदमुखरेभ्योऽनृष्यानंतर्येऽञ् यञ् च गर्गपूर्वेभ्यः
ब्राह्मणकौशिकयोर्मधुवभ्रोरांगिरसे एव कपिबोधात्
तत एवं वतंडाल्लुक् स्त्रियां भवेत्फञ् तथाऽश्वमुख्येभ्यः
त्रैगर्ते भर्गादपि साक्षादेण् केवलं शिवादिभ्यः
तत एवावृद्धाभ्यः स्फुटं नदीमानुषीभ्य एव तथा
तन्नामिकाभ्य ऋषिकुर्वधकवृष्णिभ्य इत्यसंदेहम्
पश्चाच्च मातुरेवोत्संख्यासंभद्रपूर्विकायाश्च
कन्यायाश्चैव तथा कनीन चेति ध्रुवं परिज्ञेयम्
वत्सभरद्वाजात्रिषु विकर्णशुंगात्स्वय तथा छगलात्
पीलाया वा ढगथो मंडूकात्स्त्रीभ्यं एव ढक् साक्षात्
व्यच एवतश्चानिञ उत शुभ्रादिभ्य इति परिज्ञेयम्
तत एव काश्यपेऽपि क्रमेण साक्षात्कुषीतकाविकर्णात्
वुक् च भ्रुव उत कल्याण्यादीनामेव केवलमिनङ् स्यात्
कुलटाया वाप्येरग्वटकाया ढ्रक् तथैव गोधायाः
आरगुदीचामेव क्षुद्राभ्यो वा पितृष्वसुश्छण् च
ढाक लापो मातृष्वसुरपि च चतुष्पाभ्य एव ढञ् साक्षात्
गोष्ट्यादिभ्यश्च तथा राजश्वशुराद्यदेव धैः क्षत्रात्
खश्च कुलाद्यद्ढकञावन्यतरस्यामथो अपूर्वपदात्

साक्षान्महाकुलादञ्खञौ ढगपि दुष्कुलात्स्वसुश्छश्च
भ्रातुर्व्यच्च सपत्ने व्यन् स्यादग्रेवतीपुरोगाभ्यः
गोत्रस्त्रियां ण कुत्सन उत सौवीरेषु चैव वृद्धाट्ठक्
बहुलं फेश्छ च फांटाहृतिमिमताभ्यामसंशयं णफिञौ
अपि कुर्वादिभ्यो ण्यः साक्षात्सेनांतलक्ष्मकारिभ्यः
तत एवोदीचामिञ् फिञ् च तिकादिभ्य एव निःशंकम्
कार्मार्यकौशलाभ्यामणो व्यचः केवलं न संदेहः
वृद्धादेवागोत्रात्स्युरुदीचां कुक् च वाकिनादीनाम्
साक्षादन्यतरस्यां पुत्रांतादेव केवलं स्पष्टम्
प्राचां बहुलमवृद्धात् फिन् जातावञ्यतौ मनोः षुक् च
पौत्रप्रभृत्यपत्यं गोत्रं जीवति तु वंश्य एव युवा
भ्रातरि च ज्यायसि वा स्थविरतरे जीवतीतरसपिंडे
वृद्धस्य च पूजायां कुत्सायामेव केवलं यूनः
साक्षाज्जनपदशब्दात्केवलमञ् क्षत्रियादसंदेहम्
निःशंकं साल्वेयगांधारिभ्यां च केवलं स्पष्टम्
द्व्यञ्मगधप्रभृतेरण् वृद्धेत्कोसलपुरःसराञ्ञ्यङ् च
अपि कुरुनादिभ्यो ण्यः साल्वप्रत्यग्रथाश्मकादेरिञ्
ते तद्राजाः साक्षात्कंबोजाल्लुक् तथैव निशंकम्
तदनंतरं स्त्रियां कुर्ववंतिकुंतिभ्य एव चातश्च
न प्राच्यभर्गपूर्वकयौधेयादिभ्य इत्यसंदेहम्

## ४—द्वितीयः पादः

तेन[1] च रक्तं रागाट्ठ[2]ग्लाक्षारोचनादिति ध्येयम्
न[3]क्षत्रेण च युक्तः कालः केवलमसौ लु[4]बविशेषे
संज्ञा[5]यां श्रवणाश्वत्थाभ्यां ढ्[6]ढ्राच्छ एव निःशंकम्
ढ[7]ष्टं साम कलेर्ढग् ड्यड्ड्यौ स्फुटमेव वामदेवाच्च
तत एव रे[8]थः परिवृत इनिस्तथा[9] पांडुकंबलादेव
वैया[10]घ्रद्वैपाद[11]ञ् कौमा[12]रापूर्ववचन एव तथा
तत्रा[13]मत्रेभ्यश्चोद्धृतं व्रते[14] स्थंडिलाच्छयितरीह
साक्षा[15]द्रक्षाः संस्कृतमपि शूलो[16]खाद्यदेव [17]दंभ्रष्ठक्
केवलमन्य[18]तरस्यामुदाश्वितः स्पष्टमेव [19]ठञ् क्षीरात्
सा[20]स्मिंश्च पौर्णमासीत्यपि संज्ञायां यथायथमुपेयम्
साक्षा[21]ट्ठ[22]गाग्रहायण्यश्वत्थादेव केवलं विशदम्
[23]श्रवणाचैत्री[24]फाल्गुन्यादिभ्यः केवलं विभाषैव
[25]सा[26] देवताऽस्य [27]कस्ये[28]च्छुक्राद्धन् केवलं न संदेहः
तत एवापो[29]नप्त्रप्रभृतेर्घः केवलं [30]छं च स्पष्टम्
[31]यो[32]णौ तथा महेंद्रात्सो[33]माट्टच्ण्च क्रमेण विज्ञेयम्
[34]वाय्वृतुपित्रुषसो यद् [35]द्यावापृथिवीमुखाच्छ च तथैव
[36]अग्नेर्ढक् [37]कालेभ्यो भववर्ढ[38]ञ् प्रोष्ठपदमहाराजात्
तत एव च मा[39]तामहापितृव्यमातुलपितामहाः साक्षात्

